Begins on fol. 39*a* of the MS. described under No. 8904, wherein it is given as Nigamāntācāryacūrṇikā in the list of other works.

Complete.

A prose work in praise of Vēdāntadēśika

Beginning:

विजयी भवतु चिरन्तनभणितिशिखरपरिषदमृतनिचयपरिचयमृदुल-हृदयोदारकेदारसंरूढग्रहणधारणादिमदलमृदुलपरिपुङ्गतरङ्गितोपचयमतिवि-ततिपुण्ड्रलतिकोदाश्रितसर्वतन्त्रस्वतन्त्रतागुणमिलनललितयशोधोरणीरमणीय-मणिमालिकापरिष्कृतधरणीरमणीमणिः ।

End :

संततसमुदयदनन्तचिन्तनरससंतोषसंततिमिलदन्तःकरणमुहुर्मुहुरना-हतमोदान्तरो वेदान्तगुरुः ॥

कथासुधां कामपि तस्य सूरेरशेषलभ्यामजडैर्वतीर्णाम् ।
गिरां भरैर्गुम्भितगद्यपद्यैः सतां मुदे संप्रति दर्शयामः ॥
अजातजनसंसा(बा)धे हरेरभिमतास्पदे ।
अहीन्द्रनगरे वस्तुमाकाङ्क्षद्वत्सरान् बहून् ॥
कवितार्किकसिंहाय (. . .) वेदान्तगुरवे नमः ॥

No. 10606. वेदान्तदेशिकदिनचर्या.

VĒDĀNTADĒŚIKADINACARYĀ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 14*b* of the MS. described under No. 9388.

Complete.

Stanzas in praise of Vēdāntadēśika incidentally describing his daily life, conduct and religious observances: by Śrībhāṣya Śrīnivāsa of Kauśikagōtra, as may be learnt from the end and colophon given under No. 10625.

Beginning :

काञ्चीपुरी यस्य हि जन्मभूमिर्विहारभूर्वेङ्कटभूधरेन्द्रः ।
वासस्थली रङ्गपुरी तमीड्यं श्रीवेङ्कटेशं गुरुमाश्रयामः ॥ १ ॥
संभावना यस्य च कालकूटः सभा भुजङ्गी कुणपस्तरुण्यः ।
स्याद्रौरवं राजगृहं स जीयाच्चिरं गुरुर्वेङ्कटनाथनामा ॥ २ ॥
यः प्रातरभ्येत्य हरिं शुचीनि द्रव्याण्युपादाय शुचिः कृतेज्यः ।
स्वाध्याययुक्तो निशि योगरूपां निद्रामुपारोहति तं नताः स्मः ॥

End :

इत्येवमेवा(ता)मपि सर्वतन्त्रस्वतन्त्रवेदान्तगुरूत्तमस्य ।
नित्याभिजप्यामिह नित्यचर्यां जपन्ति ये ते दुरितं जयन्ति ॥ २३ ॥

No. 10607. वेदान्तदेशिकदिनचर्या.
VĒDĀNTADĒŚIKADINACARYĀ.

Pages, 3. **Lines**, 8 on a page.

Begins on fol. 128*a* of the MS. described under No. 9706.

Complete.

Same work as the above, but with the colophon given below :—

इति दिनचर्या समाप्ता ॥

No. 10608. वेदान्तदेशिकदिनचर्या.
VĒDĀNTADĒŚIKADINACARYĀ.

Pages, 12. **Lines**, 4 on a page.

Begins on fol. 58*a* of the MS. described under No. 9723.

Complete.

Same work as the above.

No. 10609. वेदान्तदेशिकप्रपत्तिः.
VĒDĀNTADĒŚIKAPRAPATTIḤ.

Pages, 2. **Lines**, 7 on a page.

Begins on fol. 126*b* of the MS. described under No. 9706.

Complete.

Stanzas expressing the supplicant's self-surrender to Vēdāntadēśika.

Beginning :

त्रय्यन्तदेशिकपदाब्जसुधारसज्ञं त्रय्यन्तपारगमनन्तगुरोः प्रियं तम् ।
त्रय्यन्तभाष्यरसिकोत्तमदेशिकं तं त्रय्यन्तदेशिकजयध्वजमानतोऽस्मि ॥
विद्वन्मतङ्गजशिखाभरणायमानौ विश्वातिशायिमहिमाब्धिनिदानभूतौ ।
विद्वेषिवादिमकुटीकृतकुट्ट(नौ) तौ वेदान्तसूरिचरणौ शरणं प्रपद्ये ॥ १ ॥

End :

विश्वासविष्णुपदभक्तिविरक्तिशून्यं विभ्रष्टकृत्यमपि मां विषयेषु सक्तम् ।
विद्वत्सभानुगतियोग्यमिहादधानौ वेदान्तसूरिचरणौ शरणं प्रपद्ये ॥ १० ॥

Colophon :

इति प्रपत्तिः समाप्ता ॥

No. 10610. वेदान्तदेशिकप्रपत्तिः.
VĒDĀNTADĒŚIKAPRAPATTIḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 50*a* of the MS. described under No. 8904, wherein this work has been mentioned as Ācāryāṣṭaka in the list of other works given therein.

Complete.

Same work as the above, but with the addition of two stanzas at the end as given below :—

नमो वेदान्तगुरवे नमो भूयो नमो नमः ।
संजीवनाय सर्वेषां मेषां (येन) न्यासः प्रकाशितः ॥
नमःपदमिदं भूयास्त(त्त)स्मै वेंकटसूरये ।
यद्वागमृतसेकेन संजीवितमिदं जगत् ॥

No. 10611. वेदान्तदेशिकप्रपत्तिः.
VĒDĀNTADĒŚIKAPRAPATTIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 93*a* of the MS. described under No. 1837, wherein it is mentioned as Ācāryaprapatti in the list of other works.

Complete.

Same work as the above, but with a different introductory stanza as given below :—

श्रीमल्लक्ष्मणयोगीन्द्रसिद्धान्तविजयध्वजम् ।
विश्वामित्रकुलोद्भूतं वरदार्यमहं भजे ॥

No. 10612. वेदान्तदेशिकप्रपत्तिः.
VĒDĀNTADĒŚIKAPRAPATTIḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 11*a* of the MS. described under No. 10239.

Complete.

Same work as the above.

No. 10613. वेदान्तदेशिकप्रपत्तिः. VĒDĀNTADĒŚIKAPRAPATTIḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 2*a* of the MS. described under No. 9388.

Complete.

Similar to the above. By Śrīnivāsa of Kauśikagōtra.

Beginning :

उत्प्रेक्षितो बुधजनैरुपपत्तिभिर्यो घण्टा हरेः समजनिष्ट यदात्मनेति ।
वेदान्तदेशिकगुरोः प्रथितस्य तस्य पादारविन्दयुगलं शरणं प्रपद्ये ॥ १ ॥

End :

यः श्रीयतीश्वरमहानसधुर्यनप्तृरामानुजार्यकरुणापरिबृंहितात्मा ।
तद्दर्शितेश्वयतिराजपदाब्जभृङ्गस्तत्पादपद्मयुगलं शरणं प्रपद्ये ॥ १० ॥

Colophon :

इति श्रीकौशिकश्रीनिवासार्यकृतिषु वेदान्ताचार्यप्रपदनं संपूर्णम् ॥

No. 10614. वेदान्तदेशिकप्रपत्तिः. VĒDĀNTADĒŚIKAPRAPATTIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 131*a* of the MS. described under No. 9706, wherein this work has been omitted to be included in the list of other works given therein.

Complete.

Same work as the above.

No. 10615. वेदान्तदेशिकप्रपत्तिः. VĒDĀNTADĒŚIKAPRAPATTIḤ.

Pages, 2. Lines, 23 on a page.

Begins on fol. 99*a* of the MS. described under No. 5959.

Complete.

Same work as the above, but without colophon.

No. 10616. वेदान्तदेशिकप्रपत्तिः.
VĒDĀNTADĒŚIKAPRAPATTIḤ.

Page, 1. Lines, 17 on a page.

Begins on fol. 29*a* of the MS. described under No. 2043.

Complete.

Same work as the above.

No. 10617. वेदान्तदेशिकमङ्गलाशासनम्.
VĒDĀNTADEŚIKAMAṄGALĀŚĀSANAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 125*a* of the MS. described under No. 9706, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Stanzas pronouncing benediction on Vēdāntadēśika: by Parakālayati.

Beginning:

अवतारपरां काष्ठामकारार्थस्य निर्णस्य(ये) ।
देशिकेन्द्राभिधां वन्दे देवतां (तां) दयामयीम् ॥ १ ॥
श्रीशाङ्कुतगुणश्रेष्ठदयाया वरसंस्तवात् ।
मादृशोज्जीवनार्थाय देशिकायास्तु मङ्गलम् ॥ २ ॥

End:

देशिकश्रीपदद्वन्द्वसंप्रदायसुधाप्रियैः ।
प्रार्थ्यं तन्मङ्गलमिदं परकालयतेः शुभम् ॥ ११ ॥

No. 10618. वेदान्तदेशिकमङ्गलाशासनम्.
VĒDĀNTADĒŚIKAMAṄGALĀŚĀSANAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 24*a* of the MS. described under No. 9368.

Complete.

Same work as that described under R.No. 660(*a*) of the Triennial Catalogue of MSS., Vol. I, Part I–C, but with a wrong colophon as given below and without the additional stanzas which have been given therein as end :—

इति श्रीकौशिकश्रीनिवासार्यकृतिषु वेदान्ताचार्यमङ्गलद्वादशी संपूर्णा ॥

No. **10619.** वेदान्तदेशिकमङ्गलाशासनम्.
VĒDĀNTADĒŚIKAMAṄGALĀŚĀSANAM.

Pages, 2. Lines, 7 on a page.
Begins on fol. 126*a* of the MS. described under No. 9706.
Complete.
Same work as the above, but without the additional stanzas.

No. **10620.** वेदान्तदेशिकमङ्गलाशासनम्.
VĒDĀNTĀDĒŚIKAMAṄGALĀŚĀSANAM.

Pages, 2. Lines, 24 on a page.
Begins on fol. 90*b* of the MS. described under No. 5959.
Complete.
Same work as the above.

No. **10621.** वेदान्तदेशिकमङ्गलाशासनम्.
VEDĀNTADĒŚIKAMAṄGALĀŚĀSANAM.

Pages, 5. Lines, 4 on a page.
Begins on fol. 64*a* of the MS. described under No. 9723.
Wants the introductory stanza ; otherwise complete.
Same work as the above.

No. **10622.** वेदान्तदेशिकमङ्गलाशासनम्.
VEDĀNTADEŚIKAMAṄGALĀŚĀSANAM.

Pages, 2. Lines, 17 on a page.
Begins on fol. 31*a* of the MS. described under No. 2043.
Complete.

Same work as the above, but with the addition of one stanza at the end as given below :—

भाद्रपदमासगतविष्णुविमलर्क्षे वेंकटमहीध्रपतितीर्थदिनभूते ।
प्रादुरभवज्जगति दैत्यरिपुघण्टा हन्त कवितार्किकमृगेन्द्रगुरुमूर्त्या ॥

No. 10623. वेदान्तदेशिकमङ्गलाशासनम्.
VĒDĀNTADĒŚIKAMAṄGALĀŚĀSANAM.

Pages, 5. Lines, 13 on a page.

Begins on fol. 57*a* of the MS. described under No. 2380.

Complete.

Same work as the above, but with the addition of one stanza at the end as given below :—

गुरौ वादिहंसाम्बुदाचार्यशिष्ये जना भक्तिहीना यतीन्द्राप्रियाः स्युः ।
यतीन्द्राप्रिया विष्णुकारुण्यदूराः कुतो मुक्तिवार्ता हि तादृग्जनानाम् ॥

No. 10624. वेदान्तदेशिकविंशतिः.
VĒDĀNTADĒŚIKAVIMŚATIḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 54*a* of the MS. described under No. 8904.

Complete.

Twenty stanzas in praise af Vēdāntadēśika : by Mahācārya, son of Śrīnivāsārya of Vādhūlagōtra.

Beginning :

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥
यः स्तुतिं वेङ्कटेशस्य निगमान्तगुरोर्व्यधात् ।
तं वन्दे श्रीमहाचार्यं वाधूलकुलभूषणम् ॥
तुरगवदनतेजोबृंहिताश्चर्यशक्तिः
कविकथकमृगेन्द्रः सर्वतन्त्रस्वतन्त्रः ।

जयति गुरुरबाधां वेदचूडार्थसंज्ञा-
मनितरजनलभ्यां लम्भितो रङ्गभर्त्रा ॥

End :

क्षिप्तानां(ना)सुरयोनिषु प्रतिमुहुर्मूढानधोऽधो गता-
नप्राप्यैव तु पार्थसूनुपरमानन्तार्यतो निन्दितः (?)।
नैर्गुण्येन सतां तदाप्तियशसा दग्धान् सदा वादिनो
नीचान् भाति नुदन् सतां परिवृढस्त्वय्यन्तसन्देशिकः ॥
वाधूलश्रीनिवासार्यसूनुना गुरुसेविना ।
महाचार्येण रचिता निगमान्तार्यविंशतिः ॥

No. **10625.** वेदान्तदेशिकविग्रहध्यानपद्धतिः.

VĒDĀNTADĒŚĪKAVIGRAHADHYĀNAPADDHATIḤ.

Pages, 6. Lines, 3 on a page.

Begins on fol. 17*a* of the MS. described under No. 9388. Complete.

On the manner of contemplating upon the physical body of Vēdāntadēśika: by Śrībhāṣya Śrīnivāsa of Kauśikagōtra.

Beginning :

मनःप्रसूनस्तबकं मदीयं नाथस्य कौतूहलमातनोतु ।
बिभर्ति यो भागवतेषु सर्वतन्त्रस्वतन्त्रोऽपि च पारतन्त्र्यम् ॥
श्रीवादिहंसाम्बुददेशिकेन्द्रपदाम्बुजद्वन्द्वपरागदैवम् ।
श्रीवेङ्कटेशं गुरुसार्वभौमं चेतश्चिरं भावय सौम्यरूपम् ॥

End :

रथाङ्गजलजाङ्कितः सुललितोर्ध्वपुण्ड्रोज्ज्वलः
सरोजतुलसीमणिग्रथितमालिकाभूषणः ।
सितांशुकयुगान्वितः स्मितमुखो दयाशीतलः
चकास्तु हृदि मे सदा स गुरुवेङ्कटाधीश्वरः ॥

य इदं दिनचर्यां च विग्रहध्यानपद्धतिम् ।
श्रीनिवासेन रचितां शीलयेन्मुक्त एव सः ॥

Colophon:

इति श्रीभाष्यश्रीनिवासस्य कौशिकवंशजन्मनः कृतिषु दिनचर्या विग्रहध्यानपद्धतिः(श्र)संपूर्णा ॥

No. **10626.** वेदान्तदेशिकविग्रहध्यानपद्धतिः.

VĒDĀNTADĒŚIKAVIGRAHADHYĀNAPADDHATIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 127*a* of the MS. described under No. 9706.

Complete.

Same work as the above, but without the last concluding stanza and with a brief colophon as given below.

विग्रहध्यानसोपानं समाप्तम् ॥

No. **10627.** वेदान्तदेशिकविग्रहध्यानपद्धतिः.

VĒDĀNTADĒŚIKĀVIGRAHADHYĀNAPADDHATIḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 52*a* of the MS. described under No. 8904.

Complete.

Same work as the above.

No. **10628.** वेदान्तदेशिकवैभवम्.

VĒDĀNTADĒŚIKAVAIBHAVAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 2422, wherein it is mentioned as Nigamāntāryacūrṇikā in the list of other works.

Wants the beginning; otherwise complete.

A prose hymn describing the greatness of Vēdāntadēśika: by Vēṅkaṭēśa. In the concluding stanza the year and the day of Vēdāntadēśika's death is given.

Beginning :

त्रिंशद्वारं श्रावितशारीरकभाष्य, छात्रजननिबद्ध जैत्र . . . . . दशदिशासौध, एकयामिनीविनिर्मितपादुकासहस्रश्रवणसंजातविस्मितरङ्गेश-विश्राणितकवितार्किकसिंहसमाख्याविख्यातवैदग्ध्य ।

* * * *

End :

विबुधजननाथ श्रीवेङ्कटनाथ मम नाथ नमस्ते नमः ॥
नमः पद्माक्षपौत्राय नमोऽनन्तार्यसूनवे ।
नमो वरदनाथार्यपित्रे वेदान्तसूरये ॥

* * * *

अब्दे सौम्ये च वारे गतवति तरणौ वृश्चिकं कृत्तिकर्क्षे
राकायां वेङ्कटेशो यतिनृपतिमतं सर्वतः स्थापयित्वा ।
वेदान्ताचार्यनामा विविधविरचितानेकदिव्यप्रबन्धः
श्रीशैलाधीशघण्टाकृतिवपुरभजद् देशिकेन्द्रो दयालुः ॥
निर्मितं वेङ्कटेशेन वेदान्ताचार्यवैभवम् ।
संकीर्तयेत्प्रतिदिनं वेदान्तगुरुभक्तिमान् ॥

No. **10629.** वेदान्तदेशिकवैभवप्रकाशिका.

VĒDĀNTADĒŚIKAVAIBHAVAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 16⅜ × 1¼ inches. Pages, 24. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

A commentary on the work described under the previous number: by Śrīnivāsamahāsūri, son of Śrīnivāsārya of Vādhūla-gōtra.

Beginning :

वाधूलश्रीनिवासार्यतनयं विनयोज्ज्वलम् ।
प्रज्ञानिधिं प्रपद्येऽहं श्रीनिवासं महागुरुम् ॥

श्रीनिवासमहाचार्यप्राप्तवेदान्तवैभवम् ।
लक्ष्मणार्यदयापात्रं श्रीनिवासमहं भजे ॥
कविवादिशिरोरत्नं कल्याणगुणभूषणम् ।
विश्वामित्रान्वयाब्धीन्दुं वेदान्तगुरुमाश्रये ॥
वेङ्कटेशस्य संकल्पाद्विश्वामित्रकुलाम्बुधौ ।
घण्टावतीर्णा यन्मूर्त्या तं देशिकमहं भजे ॥
काश्च्यां नभस्यश्रोणायामनन्तार्यगुरोः सुतः ।
जातो यो जनभाग्येन श्रीमन्तं तमहं भजे ॥

End :

इतीरितां रसावहां विशुद्धचेतसामिमां
त्रयीकिरीटदेशिकेन्द्रवैभप्रकाशिकाम् ।
समस्तकल्मषापहां सकृत्पठन्ति ये नरा-
स्तरन्ति तेऽशुभाम्बुधिं क्षमादयाशमान्विताः ॥
संपूर्णा निगमान्तार्यवैभवस्य प्रकाशिका ।
श्रीनिवासमहासूरिरचिता बुधसंमता ॥

No. 10630. वेदान्तदेशिकवैभवप्रकाशिका.

VĒDĀNTADĒŚIKAVAIBHAVAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 12¼ × 1⅜ inches. Pages, 28. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, new.

Complete.

Begins on fol. 25*a*. The other works herein are Sugrīvapraśna 1*a*, Ārūḍhapraśna 3*a*, Jātakacandrikā 9*a*.

Same work as the above.

No. 10631. वेदान्तदेशिकवैभवप्रकाशिका.

VĒDĀNTADĒŚIKAVAIBHAVAPRAKĀŚIKĀ.

Pages, 26. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 10541.

Complete.

Same work as the above, but without the introductory stanzas.

No. 10632. वेदान्तदेशिकस्तोत्रम्.
VĒDĀNTADĒŚIKASTŌTRAM.

Pages, 4. Lines, 7 on a page.

Begins on fol. 118*b* of the MS. described under No. 9706.
Complete.
A eulogy on Vēdāntadēśika by Vidyākara of Iḻayavilli family.

Beginning :

श्रीमाधवाङ्घ्रियुगभूमा शठारिपदधामान्तर(ङ्ग)विलस-
न्नाथावतारपरनाथालिसूक्ति (वरयाथार्थ्यसक्त)परधीः ।
रामानुजार्यमुनिनामाङ्कतत्सुगुणरामानुजाख्यगुरुराट्-
पादाब्जभक्तिहृतमोदान्तरो जयति वेदान्तदेशिकमणिः ॥ १ ॥

End :

भजद्गणसुखप्रदो भयभुजङ्गपत्रीश्वरः
त्रिवर्गमपवर्गदः सपदि हीनरूपं दधत् ।
प्रशान्तरिपुसंचयः प्रपदनाख्यशास्त्रप्रदोऽ-
निशं वसतु मानसे निगमचूलिकादेशिकः ॥ १५ ॥
श्रीबालधन्विगुरुनामसुभूषणेन
विद्याकरेण कविना गुणराजिभाजा ।
वेदान्तदेशिकपदाम्बुजयुग्मरुक्मे
स्तोत्रं समर्पितमिदं जयताम(द)जस्रम् ॥ १६ ॥

No. 10633. सप्ततिरत्नमालिकास्तोत्रम्.
SAPTATIRATNAMĀLIKĀSTŌTRAM.

Pages, 10. Lines, 7 on a page.

Begins on fol. 8*a* of the MS. described under No. 9012.
Complete.

Seventy stanzas in praise of Vēdāntadēśika : by Prativādi bhayaṅkarārya called also Aṇṇan of Vatsagōtra. According to

the stanza, which is added at the beginning, the author is said to have been a disciple of Vēdāntadēśika and of Saumyajāmātrmūni.

Beginning:

श्रीमान् वेङ्कटनाथार्यः (. . .) सदा हृदि ॥
वेदान्तदेशिककटाक्षविवृद्धबोधं
कान्तोपयन्तृयमिनः करुणैकपात्रम् ।
वत्सान्ववायमनवद्यगुणैरुपेतं
भक्त्या भजामि परवादिभयंकरार्यम् ॥
जीवनं जगतां जीयात्किमप्यपगतस्पृहम् ।
स्वतन्त्रं सर्वतन्त्रेषु वेङ्कटेशाह्वयं महः ॥ १ ॥
शोश्रूयमाणा यच्छब्दं कवितार्किककुञ्जराः ।
स्वप्ने प्राद्रुवन् भक्त्या सिंहं कमपि तं भजे ॥ २ ॥

End:

वीतदोषा विशिष्टार्था वेदान्ताचार्यसप्ततिः ।
वैष्णवैः सादरं ग्राह्या विद्वद्भिर्वीतमत्सरैः ॥ ७१ ॥
प्रतिवादिभयंकरार्यसद्गुरुणा सप्ततिरत्नमालिका ।
निगमान्तगुरोः समर्पिता चरणे तद्भजतां मुदा बुधाः ॥७१॥
कवितार्किकसिंहाय (. .) वेदान्तगुरवे नमः ॥
अद्वेषमात्रमपि वा येषां वेदान्तदेशिके ।
वटीचेटोऽस्म्यहं तषामिति वीथीषु घुष्यताम् ॥

No. 10634. सप्ततिरत्नमालिकास्तोत्रम्.
SAPTATIRATNAMĀLIKĀSTŌTRAM.

Pages, 22. Lines, 5 on a page.

Begins on fol. 3*b* of the MS. described under No. 9388, wherein this work has been mentioned as Vēdāntācāryasaptati in the list of other works given therein.

Complete.

Same work as the above, but without the introductory and concluding stanzas and with a wrong colophon as given below:—

इति श्रीकौशिकवंशजन्मनः श्रीभाष्यश्रीनिवासस्य कृतिषु वेदान्ताचार्यसप्ततिः संपूर्णा ॥

No. 10635. सप्ततिरत्नमालिकास्तोत्रम्.

SAPTATIRATNAMĀLIKĀSTŌTRAM.

Pages, 11. Lines, 7 on a page.

Begins on fol. 120*a* of the MS. described under No. 9706.

Complete.

Same work as the above, but with a different introductory stanza as given below and without colophon:—

वादिन्यागत एनमत्र कतमो हन्यादिति व्याकुलो
यं सूदं वरदोऽन्वगृह्ण(नुगृह्य)त्तु गुरुः सद्भावदूकं ततः ।
यस्योपादिशदागमान्तयुगलीश्रीसारसारं भजे
वात्स्यं सप्ततिरत्नमाल्यदममुं वादीन्द्रभीकृद्गुरुम् ॥

No. 10636. सप्ततिरत्नमालिकास्तोत्रम्.

SAPTATIRATNAMĀLIKĀSTŌTRAM.

Pages, 16. Lines, 5 on a page.

Begins on fol 42*a* of the MS. described under No. 8904.

Complete.

Same work as the above.

No. 10637. सप्ततिरत्नमालिकास्तोत्रम्.

SAPTATIRATNAMĀLIKĀSTŌTRAM.

Pages, 13. Lines, 6 on a page.

Begins on fol. 266a of the MS. described under No. 9001, wherein this work has been mentioned as Vēdāntācāryasaptati in the list of other works given therein.

Complete.

Same work as the above, but with the addition of one stanza at the end as given below.

रविसदृशतनुश्रीर्वेङ्कटाचार्यपादः
करकलितपवित्रः सोत्तरीयः स्वभावात् ।
सरसिजमणिमालामूर्ध्वपुण्ड्रं दधानो
मम मनसि विभाते संततं संनिधत्ताम् ॥

No 10638. सप्ततिरत्नमालिकास्तोत्रम्.

SAPTATIRATNAMĀLIKĀSTŌTRAM.

Pages, 14. Lines, 24 on a page.

Begins on fol. 13*a* of the MS. described under No. 5959, wherein this work has been mentioned as **Vēdāntācāryasaptati** in the list of other works given therein.

Complete.

Same work as the above, but with the addition of one stanza in the beginning as given below :—

शुभनयनकपोलं शुभ्रयज्ञोपवीतं
कमलसदृशपाणिं कान्तबाह्वन्तरालम् ।
उचितपदनिविष्टोद्र्ध्वपुण्ड्रं दधानं
श्रुतिशिखरगुरुं तं सूरिवन्द्यं भजेऽहम् ॥

No. 10639. सप्ततिरत्नमालिकास्तोत्रम्.

SAPTATIRATNAMĀLIKĀSTŌTRAM.

Pages, 15 . Lines, 7 on a page.

Begins on fol. 21*a* of the MS. described under No. 2510.

Complete.

Same work as the above, but a few stanzas at the end are in a different order.

(n) ŚIṄGARĀRYA.

No. 10640. शिङ्गरार्यदिनचर्या.

ŚIṄGARĀRYADINACARYĀ.

Pages, 23. Lines, 7 on a page.

Begins on fol. 24*a* of the MS. described under No. 10223.

Complete.

On the daily life, conduct and religious observances of Śiṅgarārya, brother of Śrīśailasūrin and son of Nṛsiṁhaguru of Iḻayavilli family and of Kauśikagōtra, who was himself the son of Śiṅgarāryanṛsiṁhadēśika.

Beginning:

श्रीमत्सौम्यनृसिंहदेशिकमणेः सूनुं दयाशेवधिं
श्रीशैलार्यगुरूत्तमादधिगतत्रय्यन्तबोधोज्ज्वलम् ।
श्रीमत्कौशिकवंशभूषणवरं श्रीमन्नृसिंहं गुरुं
श्रीवाधूलमहागुरूत्तमपदद्वन्द्वाश्रयं संश्रये ॥

श्रीबालधन्विकुलवारिधिपूर्णचन्द्रं श्रीमन्नृसिंहगुरुवर्यसुतं गुणाढ्यम् ।
श्रीशैलसूर्यनुजमेतदवाप्तबोधं श्रीशिङ्गरार्यमहमन्वहमाश्रयामि ॥

* * * *

काले प्रबुध्य कमलारमणादिपूर्वसूरीन्निजार्यचरणावनुसंदधानः ।
शिष्याप्तसंश्रितजनेषु हितं प्रियं च ध्यायन्नृसिंहगुरुरस्मदभीष्टदोऽस्तु ॥

End:

कुशिककुलतरङ्गिणीकान्तराकानिशाकामुके
रुचिरनृहरिसूरिदत्तानवद्यात्मविद्यायुजि ।
तिरुमलगुरुक्लृप्तसेतुं प्रणेतुं विधातुं विभौ
गुणगणनिधिशिङ्गरार्ये प्रकुर्यां सपर्यां सदा ॥

Colophon:

श्रीशिङ्गरार्यदिनचर्या संपूर्णा ॥

(*o*) ṢŌḌAŚĀYUDHA.

No. 10641. षोडशायुधस्तोत्रम्.
ṢŌḌAŚĀYUDHASTŌTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 133*b* of the MS. described under No. 9388.

Complete.

Stanzas in praise of the sixteen different kinds of weapons of God Viṣṇu: by Vēdāntadēśika. They are : Cakra (wheel), Paraśu (axe), Kunta (spear), Daṇḍa (stick), Aṅkuśa (goad), Hēti, Nistriṁśa (sword), Śakti (pike ?), Śaṅkha (conch), Śārṅga (bow), Pāśa (string), Sīra (plough), Vajra (thunderbolt), Gadā (club), Musala (pestle), Śūla (trident).

Beginning :

स्वसंकल्पकलाकल्पैरायुधैरायुधेश्वरः ।
जुष्टः षोडशभिर्दिव्यैर्जुषतां वः परः पुमान् ॥
यदायत्तं जगच्चक्रं कालचक्रं च शाश्वतम् ।
पातु वस्तत्परं चक्रं चक्ररूपस्य चक्रिणः ॥

End :

श्रीमद्वेङ्कटनाथेन श्रेयसे भूयसे सताम् ।
कृतेयमायुधेन्द्रस्य षोडशायुधसंस्तुतिः ॥

Colophon :

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु षोडशायुधस्तुतिः संपूर्णा ॥

No. 10642. षोडशायुधस्तोत्रम्.
ṢŌḌAŚĀYUDHASTŌTRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 22*a* of the MS. described under No. 7517 and not on fol. 21*a* as stated therein

Complete.

Same work as the above, but with a brief colophon.

(p) SUDARŚANA.

No. **10643.** सुदर्शनप्रपत्तिः.

SUDARŚANAPRAPATTIḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 16*a* of the MS. described under No. 7518.

Complete.

Stanzas in praise of and expressing one's self-surrender to Viṣṇu's 'discus.'

Beginning:

सहस्रादित्यसंकाशं सहस्रवदनं परम् ।
सहस्रदोःसहस्रारं प्रपद्येऽहं सुदर्शनम् ॥

End:

एवं षड्भिः स्तुतो देवः प्रसन्नः श्रीसुदर्शनः ।
रक्षां करोतु भगवान् सर्वत्र विजयी भवेत् ॥

Colophon:

सुदर्शनप्रपत्तिः समाप्ता ॥

No. **10644.** सुदर्शनप्रपत्तिः.

SUDARŚANAPRAPATTIḤ.

Substance, palm-leaf. Size, 1½ × 1¼ inches. Page, 1. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 14*a*. The other works herein are Sudarśanakavacamantra 1*a*, Sudarśanāṣṭaka 14*a*, Sudarśanahōmavidhi 15*a*, Hanumatkavaca 21*b*, Hanumaddvādaśanāman 22*b*, Mantraprayōga (Telugu) 23*a*, Yantras 29*a*.

Complete.

Same work as the above.

No. 10645. सुदर्शनप्रपत्तिः.

SUDARŚANAPRAPATTIḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 2*b* of the MS. described under No. 6090.

Complete.

Same work as the above, but with the addition of one stanza in the beginning as given below :—

Beginning :

भगवन् सर्वविजयी(यिन्) सहस्रारापराजित ।
शरणं त्वां प्रपन्नोऽस्मि श्रीकर श्रीसुदर्शन ॥

No. 10646. सुदर्शनप्रपत्तिः.

SUDARŚANAPRAPATTIḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 16*b* of the MS. described under No. 6180.

Complete.

Same work as the above.

No. 10647. सुदर्शनप्रपत्तिः.

SUDARŚANAPRAPATTIḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 18*a* of the MS. described under No. 7517 and not on fol. 17*a* as stated therein.

Complete.

Same work as the above, but with the addition of one stanza in the beginning and at the end as given below :—

Beginning :

षट्कोणान्तरतारमध्यनिलयं संवेददंष्ट्राननं
चक्राद्यायुधचारुषोडशभुजं षड्ज्वालकेशोज्ज्वलम् ।

वस्त्रालेपनमाल्यविग्रहगुणैस्तं बालमित्रारुणं
प्रत्यालीढपदाम्बुजं त्रिनयनं चक्राधिराजं भजे ॥

End:

शङ्खं चक्रं सचापं परशुमसिमिषुं शूलपाशाङ्कुशादीन्
बिभ्राणं वज्रखेटं हलमुसलगदाकुन्तमत्युग्रदंष्ट्रम् ।
ज्वालाकेशं त्रिनेत्रं ज्वलदनलनिभं हारकेयूरभूषं
ध्याये षट्कोणसंस्थं सकलरिपुजनप्राणसंहारचक्रम् ॥

No. **10648**. सुदर्शनशतकम्.

SUDARŚANAŚATAKAM.

Pages, 18. Lines, 8 on a page.

Begins on fol. 97*a* of the MS. described under No. 9001.

Complete.

One hundred stanzas in praise of Viṣṇu's 'discus': by Kūranārāyaṇa.

Beginning:

सौदर्शन्युज्जिहाना दिशि विदिशि तिरस्कृत्य सावित्रमर्चि-
र्बाह्याबाह्यान्धकारक्षतजगदगदंकारभूम्ना स्वधाम्ना ।
दोःखर्जूदूरगर्जद्विबुधरिपुवधूकण्ठवैकल्यकल्या
ज्वाला जाज्वल्यमाना वितरतु भवतां वीप्सयाभीप्सितानि ॥

End:

पद्यानां तत्त्वविद्याद्युमणिगिरिशाविध्यङ्गसंख्याधराणा-
मर्चिष्वङ्गेषु नेम्यादिषु च परमतः पुंसि षड्विंशतेश्च ।
संख्यै(ख्ये): सौदर्शनं यः पठति कृतमिदं कूरनारायणेन
स्तोत्रं निर्विष्टभोगो भजति स परमां चक्रसायुज्यलक्ष्मीम् ॥

Colophon:

इति कूरनारायणकृतं सुदर्शनशतकं समाप्तम् ॥

No. 10649. सुदर्शनशतकम्.

SUDARŚANAŚATAKAM.

Substance, paper. Size, 8¼ × 6¼ inches. Pages, 14. Lines, 32 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Sudarśanaśataka-vyākhyā 8*a*.

Complete.

Same work as the above.

No. 10650. सुदर्शनशतकम्.

SUDARŚANAŚATAKAM.

Pages, 12. Lines, 6 on a page.

Begins on fol. 121*a* of the MS. described under No. 2079.

Complete.

Same work as the above, but with the addition of some stanzas in the beginning and at the end as given below :—

Beginning :

यो नित्यमच्युतपदाम्बुज (. . . .) रामानुजस्य चरणौ शरणं भजामि ॥
रङ्गेशविज्ञप्तिकरामयस्य चकार चक्रेशनुतिं निवृत्तये ।
समाश्रयेऽहं वरपूरणीयः(यं) तं कूरनारायणनामिनं(मकं) मुनिम् ॥

End :

यः श्रीसुदर्शनस्तुत्या लोकं रक्षितवान् गुरुः ।
कूरनारायणोऽहं तं भजामि मुनिपुङ्गवम् ॥
षट्कोणान्तरतारमध्यनिलयं संवेददंष्ट्रानन
चक्राद्यायुधचारुषोडशभुजं सज्वालकेशोज्ज्वलम् ।
वस्त्रालेपनमाल्यविग्रहगुणैस्तं बालमित्रारुणं
प्रत्यालीढपदाम्बुजं त्रिनयनं चक्राधिराजं भजे ॥
शङ्खं चक्रं च पाशं परशुमसिमिषुं शूलपाशाङ्कुशाब्जं
बिभ्राणं वज्रखेटं हलमुसलगदाकुन्तमत्युग्रदंष्ट्रम् ।

ज्वालाकेशं त्रिनेत्रं ज्वलदनलनिभं हारकेयूरभूषं
ध्याये षट्कोणसंस्थं सकलरिपुजनप्राणसंहारचक्रम् ॥

No. 10651. सुदर्शनशतकम्.
SUDARŚANAŚATAKAM.

Pages, 22. Lines, 9 on a page.

Begins on fol. 1*a* of the MS described under No. 7518.

Complete.

Same work as the above.

No. 10652. सुदर्शनशतकम्.
SUDARŚANAŚATAKAM.

Pages, 13. Lines, 17 on a page.

Begins on fol. 43*a* of the MS. described under No. 2043.

Complete.

Same work as the above, but with a brief colophon.

No. 10653. सुदर्शनशतकम्.
SUDARŚANAŚATAKAM.

Pages, 27. Lines, 4 on a page.

Begins on fol. 1*a* of the MS. described under No. 7517.

Almost complete.

Same work as the above.

No. 10654. सुदर्शनशतकम्.
SUDARŚANAŚATAKAM.

Substance, palm-leaf. Size, 14 × 1¼ inches. Pages, 36. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete.

Same work as the above, but with the addition of one stanza in the beginning and at the end as given below.

This manuscript is said to have belonged to Vēdavyāsabhaṭṭa and to have been copied personally by Tirumalācāriyar, son of Kōmāṇḍūr Veṅkaṭatturaivar of Tiruccitrakūṭam, who lived in Śrīraṅgapatṇam, the copying having been completed on the 16th day of Paṅguni in the year Ānanda.

Beginning:

श्रीमत् सौदर्शनं स्तोत्रं यश्चक्रे मुनिपुङ्गवः ।
तमहं शिरसा वन्दे कूरनारायणं भजे(मुनिम्) ॥

End:

कोटिसूर्यप्रकाशाय कुङ्कुमारुणवक्षसे ।
स्फुरद्धेच(ति)सहस्राय सहस्राराय मङ्गलम ॥

Colophon:

इति श्रीसुदर्शनशतके पुरुषवर्णनम् ॥

No. **10655.** सुदर्शनशतकम् —सव्याख्यानम्.

SUDARŚANAŚATAKAM WITH COMMENTARY.

Substance, palm-leaf. Size, 18½ × 1⅜ inches. Pages, 133. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Same work as the above, but with the addition of a commentary.

Beginning:

रङ्गेशविज्ञप्तिकरामयस्य चकार चक्रेशनुतिं निवृत्तये ।
समाश्रयेऽहं वरपूरणीयं तं कूरनारायणनामकं मुनिम् ॥
सौदर्शन्युज्जिहाना दिशि विदिशि तिरस्कृत्य सावित्रमार्चिः
* * * *
ज्वाला जाज्वल्यमाना वितरतु भवतां वीप्सयाभीप्सितानि ॥

सौदर्शनीति । बाह्यश्चाबाह्यश्च बाह्याबाह्यौ, बाह्याबाह्यौ च तावन्धकारौ च तथोक्तौ । बाह्यान्धकारः बाह्येषु स्रक्चन्दनादिषु भोग्यताभ्रान्तिः ;

संसारसर्पदष्टानां भोग्याः स्रक्चन्दनादयः ।
मोहेन मधुरायन्ते निसर्गान्निम्बसंनिभाः ॥

इत्युक्तत्वात् । ज्ञानशक्त्यादिगुणगणविभूषिते सकलजगदन्तर्यामित्वे-नाबाह्यविषये श्रीरङ्गनायके निर्गुणत्वादिभ्रान्तिरबाह्यान्धकारः । अथवा विशृङ्खलविजृम्भमाणतमःपटलं बाह्यान्धकारः । अज्ञानान्यथाज्ञानविपरीत ज्ञानादिरबाह्यान्धकारः ।

End:

कूरनारायणेन सर्वज्ञचूडामणिना महानुभावेन कृतं विरचितमिदं सुदर्शनस्तोत्रं यः पठति स हि पुरुषः निष्ट(र्वि)ष्टभोगः उपभुक्ते(हलौकिक-सुखस्तदनन्तरं) परमां चक्रसायुज्यलक्ष्मीं भजति ॥

षट्कोणान्तरतारमध्यनिलयं (. . .) चक्राधिराजं भजे ।
. . . तोद्दण्डकोदण्डाद्यायुधोज्ज्वलः ।
श्रीसुदर्शनभूमा मे वाचं दिशतु सुन्दरम् ॥
चक्राह्वयधरः श्रीमान् माधवार्योऽकरोन्मुदा ।
पूर्वाचार्यकृतग्रन्थभाष्यं (तस्मै नमो नमः) ॥
रङ्गेशविज्ञप्तिकरामयस्य (. .) तं कूरनारायणनामकं मुनिम् ॥

Colophon:

श्रीसुदर्शनशतकव्याख्यानं समाप्तम् ॥

No. **10656.** सुदर्शनशतकम्—सव्याख्यानम्.

SUDARŚANAŚATAKAM WITH COMMENTARY.

Substance, palm-leaf. **Size**, $8\frac{3}{8} \times 1\frac{3}{8}$ inches. **Pages**, 203. **Lines**, 10 on a page. **Character**, Grantha. **Condition**, good. **Appearance**, new.

Complete.

Same work as the above.

The scribe gives the date of the transcription thus :

शोभकृन्नामसंवत्सरचैत्रशुद्धचतुर्दशीभौमवासरेऽयं ग्रन्थो लिखित्वा परिसमापितः ॥

No. 10657. सुदर्शनशतकम्—सव्याख्यानम्.
SUDARŚANAŚATAKAM WITH COMMENTARY.

Substance, palm-leaf. Size, 15½ × 1⅜ inches. Pages, 158. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Complete.

Same work as the above, but without the extra stanzas given at the end.

The scribe adds thus :

बसवश्रीपादपङ्केजनिमानसहेतुना ।
सौदर्शनाख्यं शतकं लिखितं (व्यलिखत्) मल्लिकार्जुनः ॥
बसवब्रह्मानन्दरसं बसवनामसुधारसम् ॥
बसवपादाम्बुजरसं वरिवस्ये निरन्तरम् ॥

No. 10658. सुदर्शनशतकव्याख्या.
SUDARŚANAŚATAKAVYĀKHYĀ.

Pages, 128. Lines, 20 on a page.

Begins on fol. 8*a* of the MS. described under No. 10649.

Complete.

Same commentary as the above.

No. 10659. सुदर्शनस्तोत्रम्.
SUDARŚANASTŌTRAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 15*a* of the MS. described under No. 6180.

Complete.

A hymn of praise and prayer addressed to Viṣṇu's 'discus'

Beginning :

चक्राम्बुजे समासीनं चक्राद्यायुधभूषणम् ।
चक्रमन्त्राधिदैवं च चक्रमन्त्रेण चिन्तयेत् ॥

सर्वावयवसंपूर्णमष्टबाहुं सुदर्शनम् ।
दंष्ट्रान्त(क)रालवदनं भयस्यापि भयंकरम् ॥

End :

कनककिरणचक्रं भास्कराकोटिचक्रं
सुररिपुदहन(व)(चक्रं) प्राणसंहारचक्रम् ।
जयतु ज(य)तुं चक्रं श्रीमतां विष्णुचक्रं
प्रकटितभुजचक्रं पातु मां विष्णुचक्रम् ॥

No. 10660. सुदर्शनाष्टकम्.
SUDARŚANĀṢṬAKAM.

Page, 1. Lines, 17 on a page.

Begins on fol. 10*a* of the MS. described under No. 2886, wherein this work has been mentioned as Sudarśanastōtra in the list of other works given therein.

Complete.

Eight stanzas in praise of Viṣṇu's 'discus': by Vēdāntadēśika.

Beginning :

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥
प्रतिभटश्रेणिभीषण परगुणस्तोमभूषण
जगदवस्थानकारण जन(नि)भयस्थानतारण
निखिलदुष्कर्मकर्शन निगमसद्धर्मदर्शन
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥ १

End :

भुवननेतस्त्रयीमय वस(सव)नतेजस्त्रयीमय
निरवधिस्वादुचिन्मय निखिलशक्ते जगन्मय
अमितविश्वक्रियामय शमितविष्वग्भयामय
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥ ८ ॥

द्विचतुष्कमिदं प्रभूतसारं पठतां वेङ्कटनायकप्रणीतम् ।
विषमेऽपि मनोरथः प्रधावन्न विहन्येत रथाङ्गधुर्यगुप्तः ॥
कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

No. **10661.** सुदर्शनाष्टकम्.
SUDARŚANĀṢṬAKAM.

Pages, 4. Lines, 4 on a page.
Begins on fol. 3*a* of the MS. described under No. 9683.
Almost complete.
Same work as the above.

No. **10662.** सुदर्शनाष्टकम्.
SUDARŚANĀṢṬAKAM.

Pages, 3. Lines, 6 on a page.
Begins on fol. 18*a* of the MS. described under No. 6180.
Wants beginning ; otherwise complete.
Same work as the above

No. **10663.** सुदर्शनाष्टकम्.
SUDARŚANĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.
Begins on fol. 3*a* of the MS. described under No. 2422.
Complete.
Same work as the above.

No. **10664.** सुदर्शनाष्टकम्.
SUDARŚANĀṢṬAKAM.

Pages, 5. Lines, 4 on a page.
Begins on fol. 84*a* of the MS. described under No. 5922.
Complete.
Same work as the above, but with the addition of one stanza in the beginning which is given as the end in No. 10647.

No. **10665.** सुदर्शनाष्टकम्.

SUDARŚANĀṢṬAKAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 135*a* of the MS. described under No. 9388.

Complete.

Same work as the above, but with colophon as given below :—

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु सुदर्शनाष्टकं संपूर्णम् ॥

No **10666.** सुदर्शनाष्टकम्.

SUDARŚANĀṢṬAKAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 24*a* of the MS. described under No. 7517 and **not** on fol. 2?*a* as stated therein.

Complete.

Same work as the above.

No. **10667.** सुदर्शनाष्टकम्.

SUDARŚANĀṢṬAKAM

Page, 1. Lines, 8 on a page.

Begins on fol. 290*b* of the MS. described under No. 9001.

Complete.

Same work as the above.

No. **10668.** सुदर्शनाष्टकम्.

SUDARŚANĀṢṬAKAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 14*a* of the MS. described under No. 10644.

Incomplete.

Same work as the above.

(q) SAUMYAJĀMĀTṚMUNI.

No. 10669. वरवरमुन्युद्बोधनम्.

VARAVARAMUNYUDBŌDHANAM.

Pages, 3. Lines, 8 on a page.

Begins on fol. 28b of the MS described under No. 9534.

Complete.

Stanzas awakening and wishing good morning to Varavaramuni or Maṇavāḷamāmuni, a renowned Vaiṣṇava religious teacher of Southern India.

Beginning :

रविरुदयत्यथापि न विनश्यति मे तिमिरं
विकसति पङ्कजं हृदयपङ्कजमेव न मे ।
वरवरयोगिवर्य वरणीयगुणैकनिधे
जय जय देव जागृहि जनेषु निधेहि दयाम् ॥१ ॥

End :

योगी वानाद्रिनाम(मा) वरदगुरुवरो वादिभीतिप्रदो यः
श्रीमान् भट्टेशयोगी वरचरितकरो देशिको देवराजः ।
अन्ये चार्या महान्तस्तव पदयुगलं सेवितुं जागरूकाः
स्वामिन्नुत्तिष्ठ शीघ्रं रुचिरवरमुने यामिनी सुप्रभातं(ता) ॥

No. 10670. सौम्यजामातृमुनिदिनचर्या.

SAUMYAJĀMĀTṚMUNIDINACARYĀ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 11a of the MS. described under No. 9534.

Contains the Pūrvadinacaryā complete.

Same work as that described under R. No. 173(e) of the Triennial Catalogue of MSS., Vol. I, Part I-A.

No. 10671. सौम्यजामातृमुनिदिनचर्या.

SAUMYAJĀMĀTṚMUNIDINACARYĀ.

Pages, 7. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 7015.
Contains the Pūrvadinacaryā complete.
Same work as the above.

No. 10672. सौम्यजामातृमुनिदिनचर्या.

SAUMYAJĀMĀTṚMUNIDINACARYĀ.

Pages, 9. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 7016.
Contains the Pūrvadinacaryā.
Same work as the above.

No. 10673. सौम्यजामातृमुनिदिनचर्या.

SAUMYAJĀMĀTRMUNIDINACARYĀ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 2*b* of the MS. described under No. 9663.
Contains the Pūrvadinacaryā.
Same work as the above.

No. 10674. सौम्यजामातृमुनिदिनचर्या.

SAUMYAJĀMĀTṚMUNIDINACARYĀ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 20*a* of the MS. described under No. 9652.
Contains the Pūrvadinacaryā.
Same work as the above.

No. 10675. सौम्यजामातृमुनिदिनचर्या.

SAUMYAJĀMĀTṚMUNIDINACARYĀ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 8*a* of the MS. described under No. 9672.
Contains the Pūrvadinacaryā.
Same work as the above.

No. 10676. सौम्यजामातृमुनिदिनचर्या.
SAUMYAJĀMĀTṚMUNIDINACARYĀ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 8*b* of the MS. described under No. 7016.

Contains the Uttaradinacaryā.

Same work as the above.

No. 10677. सौम्यजामातृमुनिदिनचर्या.
SAUMYAJĀMĀTṚMUNIDINACARYĀ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 25*b* of the MS. described under No. 9652, wherein this work has been omitted to be mentioned in the list of other works given therein.

Contains the Uttaradinacaryā.

Same work as the above.

No. 10678. सौम्यजामातृमुनिदिनचर्या.
SAUMYAJĀMĀTṚMUNIDINACARYĀ.

Pages, 7. Lines, 5 on a page.

Begins on fol. 6*a* of the MS. described under No. 9661.

Contains the Pūrvadinacaryā.

Same work as the above.

No. 10679. सौम्यजामातृमुनिदिनचर्या.
SAUMYAJĀMĀTṚMUNIDINACARYĀ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 15*a* of the MS. described under No. 9672.

Contains the Uttaradinacaryā.

Same work as the above.

This manuscript is said to have been copied by Muḍumbai Narasiṁhācār, the transcription having been completed on the 20th of the month of Māśi in the year Plava.

No. 10680. सौम्यजामातृमुनिदिनचर्या.
SAUMYAJĀMĀTṚMUNIDINACARYĀ.

Pages, 2. Lines, 8 on a page.
Begins on fol. 4*a* of the MS. described under No. 9663.
Contains Uttaradinacaryā.
Same work as the above, but with the addition of one stanza at the end as given below :—

अर्वाञ्चो यत्पदसरसिजद्वन्द्वमाश्रित्य पूर्वे
मूर्ध्ना यस्यान्वयमुपगता देशिका मुक्तिमाप्ताः ।
सोऽयं रामानुजमुनिरपि स्वीयमुक्तिः करस्था
यत्संबन्धादमनुत कथं वर्ण्यते कूरनाथः ॥

No. 10681. सौम्यजामातृमुनिदिनचर्या.
SAUMYAJĀMĀTṚMUNIDINACARYĀ.

Pages, 2. Lines, 8 on a page.
Begins on fol. 13*b* of the MS. described under No. 9534.
Contains the Uttaradinacaryā complete.
Same work as the above.

No. 10682. सौम्यजामातृमुनिदिनचर्या.
SAUMYAJĀMĀTṚMUNIDINACARYĀ.

Pages, 8. Lines, 5 on a page.
Begins on fol. 10*a* of the MS. described under No. 7015.
Contains the Uttaradinacaryā.
Same work as the above.

No. 10683. सौम्यजामातृमुनिदिनचर्या.
SAUMYAJĀMĀTṚMUNIDINACARYĀ.

Pages, 5. Lines, 5 on a page.
Begins on fol. 12*a* of the MS. described under No. 9661.
Contains the Uttaradinacaryā.

Same work as the above, but with the addition of one stanza at the end as given below :—

काषायशोभि कमनीयशिखानिवेशं दण्डत्रयोज्ज्वलकरं विमलोपवीतम् ।
उद्यद्दिनेशनिभमुल्लसदूर्ध्वपुण्ड्रं रूपं तवास्तु यतिराज दृशोर्ममाग्रे ॥

No. 10684. सौम्यजामातृमुनिदिनचर्या.

SAUMYAJĀMĀTṚMUNIDINACARYĀ.

Pages, 13. Lines, 4 on a page.

Begins on fol. 4*a* of the MS. described under No. 9675.

Contains the Uttaradinacaryā.

Same work as the above.

No. 10685. सौम्यजामातृमुनिदिनचर्या—सव्याख्या.

SAUMYAJĀMĀTṚMUNIDINACARYĀ WITH COMMENTARY.

Substance, palm-leaf. Size, 16½ × 1⅝ inches. Pages, 94. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

The text deals with the daily life, conduct and religious observances of Maṇavaḷamāmuni. The author of the text is Dēvarājārya and the author of the commentary is Vīrarāghava of Vādhūlagōtra and a disciple of Varadārya.

Beginning :

सये(सेवेऽ)हं भक्तिसाराख्यं सौदर्शनमहं महः ।
ययौ जङ्गमतां येन वेगासेतुर्विभावितः ॥
दिनचर्यां व्याकरोति देवराजार्यनिर्मिताम् ।
वरदार्यदयानिघ्नो वाधूलो वीररा(घवः) ॥

अत्र भगवान् वरवरमुनिदासापरनामधेयो देवराजगुरुः गुरोर्नाम सदा जपेत्, तदधीनश्च वर्तेत साक्षान्नारायणो हि सः ।

* * * *

हिताभिनिवेशस्तमेवाधिकृत्य दिनचर्याख्यप्रबन्धं प्रारभमाणः चिकीर्षितस्य निर्विघ्नपरिसमाप्त्यर्थं स्वाधिकारानुरूपं गुरुनमस्क्रियारूपं मङ्गलमाचर(ति)—

अङ्गे कवेरकन्यायाः (. . .) वन्दे वरवरं मुनिम् ॥

इयं हि दिनचर्या पङ्क्तिपावनं भगवन्तं वरवरमुनिमधिकृत्य प्रवृत्ता, स्वयमपि पङ्क्तिपावनोऽपि वैदिकवरपङ्क्तिशोऽनुयागनिष्ठानारम्भेष्वनुसन्धीयत इति सम्प्रदायः ।

अङ्ग इत्यादि । तुङ्गे निरतिशये इदं भुवनमङ्गलविशेषणम् ।

End :

भक्त्या दिनचर्यामनुध्यायन्नित्यत्र च,

यश्चेमां संहितां पुण्यां शृणुयाच्छ्रावयेत वा ।
स मुक्तः स(र्वपापेभ्यः) सर्वान् कामान् समश्नुते ॥

इति भारद्वाजवचनम्,

वृत्तिं सन्तोऽनुभूयेमामनुरूपा महात्मनः ।
परत्र चानुमोदन्ते परमेण विपश्चिता ॥

इत्यस्यार्थश्चोपबृंहित इति रमणीयम् ॥

स्वयं प्रमाणेऽप्याचारे सौम्यजामातृयोगिनः ।
स्मृतिप्रपञ्चनं तज्ज्ञास्तुष्यन्त्विति मया कृतम् ॥

Colophon :

विशिष्टशिष्टजनगोष्ठीगरिष्ठेनाखिलभुवनसारभक्तिसारयोगिवरराजधानीविजयध्वजेन त्रिविधतत्त्वनिर्वाहकेन वाधूलसन्तानसन्तानेन वीरराघवगुरुणा निर्मिता यतिराजापरावतारस्य वरवरमुनेः पूर्वोत्तरदिनचर्याव्याख्या सदाचारदीपिकासमाख्या संपूर्णा ॥

श्रीभाष्य(ष्या)रम्भभाजां सुविशदमतये संग्रहं भाष्यरत्नं
लोकाचार्योक्ततत्त्वत्रयकृतिविवृतिं सर्वलोकोपकृत्यै ।

कुर्वाणः पूर्वभावं बहुमपि कथयन् द्राक् प्रदिष्टार्यवाचां
श्रीमान् रामानुजात्मा जगति विजयतां रम्यजामातृयोगी ॥
श्रीमान् शिष्टपरित्राता कुदृष्टिगजकेसरी ।
रम्यजामातृयोगी मे सन्निधत्तां सदा हृदि ॥

No. 10686. सौम्यजामातृमुनिमङ्गलाशासनम्.

SAUMYAJĀMĀTṚMUNIMAṄGALĀŚĀSANAM.

Pages, 2. Lines, 9 on a page.

Begins on fol. 131*a* of the MS. described under No. 9653.

Complete.

Stanzas pronouncing benediction on Maṇavāḷamāmuni: by Prativādibhayaṅkara Aṇṇan (apparently).

Beginning:

यश्चक्रे मङ्गलाशास्ति मनोज्ञवरयोगिनः ।
प्रणमामि दयालुं तं परवादिभयङ्करम् ॥
श्रीमते रम्यजामातृमुनीन्द्राय महात्मने ।
श्रीरङ्गवासिने भूयान्नित्यश्रीर्नित्यमङ्गलम् ॥

End:

मङ्गलं वेदवेदान्तसंक्रान्तस्वान्तवृत्तये ।
मङ्गलं निखिलध्येयनामधेयाय मङ्गलम् ॥
तुलामासे(. . .)नित्यमङ्गलम् ।
यदवतरणमूलं(. . .)मूलम् ।
कौतस्कुतक(. . .)गुरवे नमः ॥

No. 10687. सौम्यजामातृमुनिमङ्गलाशासनम्.

SAUMYAJĀMĀTṚMUNIMAṄGALĀŚĀSANAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 14*a* of the MS. described under No. 9651, wherein this work has been mentioned as Varavaramnistōtra in the list of other works given therein.

Complete.

Same work as the above, but with different introductory stanzas and with the addition of three stanzas at the end as given below :—

Beginning :

श्रीमान् शिष्टपरित्रातृ(ता) कुदृष्टिगजकेसरी ।
सौम्यजामातृयोगी मे संनिधत्तां सदा हृदि ॥
श्रीमल्लक्ष्मीशपाराथ्र्यस्थापनैकधुरंधरम् ।
श्रीवत्सकुलसंभूतं देवराजगुरुं भजे ॥

End :

श्रीमद्रङ्गं जयतु परमं धाम तेजोनिधानं
भूमा तस्मिन् भवतु कुशली कोऽपि भूमासहायः ।
दिव्यं तस्मै दिशतु विभवं देशिको देशिकानां
काले काले वरवरमुनिः कल्पयन् मङ्गलानि ॥

* * * *

तृणीकृतविरिञ्चादिनिरङ्कुशविभूतयः ।
रामानुजपदाम्भोजसमाश्रयणशालिनः ॥

No. 10688. सौम्यजामातृमुनिमङ्गलाशासनम्.

SAUMYAJĀMĀTṚMUNIMAṄGALĀŚĀSANAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 189*a* of the MS. described under No. 9001.

Same work as the above, but with a different beginning and end as given below :—

Beginning :

मङ्गलाशासनं कर्तुं मनोज्ञवरयोगिनः ।
मनः प्रसीद भद्रं ते त्वं मूलं मोक्षमात्मनाम् ॥

End :

मङ्गलं पन्नगेन्द्राय मर्त्यरूपाय मङ्गलम् ।
मङ्गलं रम्यजामातृमुनिवर्याय मङ्गलम् ॥

No. 10689. सौम्यजामातृमुनिशतकम्.

SAUMYAJĀMĀTṚMUNIŚATAKAM.

Substance, palm-leaf. Size, 8¾ × 1½ inches. Pages, 34. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Saumyajāmātṛmuniśataka with commentary 18*a*.

Same work as that described under R.No. 283 of the Triennial Catalogue of MSS., Vol. I., Part I–A, but with beginning and colophon.

Beginning :

वरवरमुनिवर्यपादरत्नं वरदगुरुं गुरुमाश्रये गुरूणाम् ।
उपनिषदुपगीतमर्थतत्त्वं तदिह यदीयवशंवदं समिन्धे ॥
गुणमणिनिधये नमो नमस्ते गुरुकुलधुर्य नमो नमस्ते ।
वरवरमुनये नमो नमस्ते यतिवरतत्त्वविदे नमो नमस्ते ॥

Colophon :

वरवरमुनिशतकं संपूर्णम् ॥

No. 10690. सौम्यजामातृमुनिशतकम्—मणिप्रवालव्याख्यासहितम्.

SAUMYAJĀMĀTṚMUNIŚATAKAM WITH MAṆIPRAVĀLA COMMENTARY.

Pages, 322. Lines, 8 on a page.

Begins on fol. 18*a* of the MS. described under the last number. Breaks off in the 81st stanza.

Same work as the above, but with a commentary in Maṇipravāla, *i.e.*, Sanskritic Tamil.

No. 10691. सौम्यजामातृमुनिस्तोत्रम्.

SAUMYAJĀMĀTṚMUNISTŌTRAM.

Page, 1. Lines, 9 on a page.

Begins on fol. 131*b* of the MS. described under No. 9653. Complete.

Stanzas in praise of Varavaramuni or Maṇavāḷamāmuni.

Beginning :

अमलबोधमहोदधिमकृतकभवदाङ्घ्रिसौहृदोत्कर्षम् ।
वरदगुरुमेव पश्यन् वरवरमुनिवर्य मयि विधेहि दयाम् ॥

End :

वाग्भूषणं वकुलभूषणदिव्यशास्त्रं यो मादृशां च सुगमं व्यवृणोद्दयालुः
रम्योपयन्तृमुनये यमिनां वराय तस्मै नमः शमदमादिगुणार्णवाय ॥

---

(23) ŚAKTI.

No. 10692. अन्नपूर्णाष्टकम्. ANNAPŪRṆĀṢṬAKAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 14*a* of the MS. described under No. 5559.

Complete.

Same work as that described under R.No. 488 (*f*) of the Triennial Catalogue of MSS., Vol. I., Part I–B, but with a colophon as given below :—

अन्नपूर्णाष्टकं संपूर्णम् ॥

From another copy of the same work described under No. 10698 *sequor*, the author of this work is made out to be Vyāsā.

No. 10693. अन्नपूर्णाष्टकम्. ANNAPŪRṆĀṢṬAKAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 52*a* of the MS. described under No. 5422.

Complete.

Same work as the above, but without colophon.

No. 10694. अन्नपूर्णाष्टकम्. ANNAPŪRṆĀṢṬAKAM.

Pages, 6. Lines, 5 on a page.

Begins on fol. 14*a* of the MS. described under No. 9372.

Complete.

Same work as the above.

No. 10695. अन्नपूर्णाष्टकम्.
ANNAPŪRṆĀṢṬAKAM.

Pages, 2. Lines, 11 on a page.

Begins on fol. 32*a* of the MS. described under No. 120, wherein this work has been mentioned as Annapūrṇēśvarīstōtra in the list of other works given therein.

Complete.

Same work as the above.

No. 10696. अन्नपूर्णाष्टकम्.
ANNAPŪRṆĀṢṬAKAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 23*a* of the MS. described under No. 3178.

Complete.

Same work as the above, but with a colophon as given below :—

अन्नपूर्णास्तोत्रं संपूर्णम् ॥

No. 10697. अन्नपूर्णाष्टकम्.
ANNAPŪRṆĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 20*b* of the MS. described under No. 2037, wherein this work has been mentioned as Annapūrṇēśvarīstuti in the list of other works given therein.

Breaks off in the sixth stanza.

Same work as the above.

No. 10698. अन्नपूर्णाष्टकम्.
ANNAPŪRṆĀṢṬAKAM.

Pages, 4. Lines, 4 on a page.

Begins on fol. 10*a* of the MS. described under No. 9869.

Complete.

Same work as the above, but with the addition of a few lines in the beginning and end as given below.

Beginning :

व्यास उवाच—

End:

काशिपुराधीश्वरि मातार्ण(तोऽन्न)पूर्णेश्वरि ॥
. . . . . भिक्षां देहि कृपावलम्बनकारि ।

Colophon:

इति श्रीअन्नपूर्णेश्वरीस्तवः ॥

व्यासविरचितायां परमरहस्यं पठति यः पुमान् । सर्वाभीष्टसिद्धिर्नसंशयं भवेत् ॥

काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥

No. 10699. अन्नपूर्णाष्टकम्.
ANNAPŪRṆĀṢṬAKAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 79*a* of the MS. described under No. 757.

Almost complete.

Same work as the above.

No. 10700. अन्नपूर्णाष्टकम्.
ANNAPŪRṆĀṢṬAKAM.

Substance, palm-leaf. Size, 7¾ × 1 inches. Pages, 7. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 8*a*. The other works herein are Śanaiścara stōtra 1*a*, Dakṣiṇāmūrtyaṣṭaka 14*a*.

Complete.

Same work as the above.

No. 10701. अन्नपूर्णाष्टकम्.
ANNAPŪRṆĀṢṬAKAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 2*a* of the MS. described under No. 6548, wherein this work has been mentioned as Annapūrṇādaśaka 1*a* in the list of other works given therein.

Complete.

Same work as the above, but with two additional stanzas and with colophon which is given below :—

अन्नपूर्णादशकं सपूर्णम् ॥

No. 10702. अन्नपूर्णास्तोत्रम्.
ANNAPŪRṆĀSTŌTRAM.

Pages, 3. Lines, 10 on a page.

Begins on fol. 7*b* of the MS. described under No. 6548.
Complete in three stanzas
Similar to the above.

Beginning :

रक्ताभामरुणांशुकाम्बरधरामानन्दपूर्णाननां
मुक्ताहारविभूषितां कुचभरक्रान्तां सकाञ्चीगुणाम् ।
देवीं दिव्यरसान्नपूर्णकनकामम्भोजदर्वीकरां
ध्यायेच्छङ्करवल्लभां त्रिणयनाकल्पां प्रलम्बालकाम् ॥

End :

दारिद्र्यदावानलदह्यमानं स्वाहान्नपूर्णे गिरिराजकन्ये ।
कृपाम्बुवर्षैरभिषिञ्चयाशु त्वत्पादपद्मार्पितचित्तवृत्तिम् ॥
इत्यन्नपूर्णास्तुतिबद्धमेतत् श्लोकत्रयं यः पठतीह भक्त्या ।
तदै(स्मै द)दात्यन्नविवृद्धिमम्बा श्रियं च विद्यां च यशंच(शश्च) मुक्तिम् ॥

No. 10703. अन्नपूर्णास्तोत्रम्.
ANNAPŪRṆĀSTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 199*b* of the MS. described under No. 119.
Complete.
Similar to the above.

Beginning :

(भगवति) भवरोगात्पीडितं दुष्कृतोत्थात् सुतदुहितृकलत्रोपद्रवेणानुयातम् ।
विलसदमृतदृष्ट्या वीक्ष्य विभ्रान्तचित्तं सकलभुवनमातस्त्राहि मामों नमस्ते ॥

रुद्रताण्डवविलोकनलोलां भद्रवक्त्रनयनां भवकान्ताम् ।
अन्नदाननिरतां जननीं तां चिन्तयेदुषसि चित्रदुकूलाम् ॥

End:

अन्नपूर्णास्तुतं नित्यं यः पठेत्सततं नरः ।
तस्य मृत्युभयं नास्ति भुक्तिमुक्तिफलप्रदम् ॥

No. **10704.** अन्नपूर्णेश्वरीध्यानम्.
ANNAPŪRṆĒŚVARĪDHYĀNAM.

Pages, 4. Lines, 20 on a page.

Begins on fol. 123*b* of the MS. described under No. 2373.
Complete. From Mahātripurāsiddhānta.
Stanzas in contemplation of Annapūrṇēśvarī.

Beginning:

अन्नपूर्णामनुं वक्ष्ये विद्याप्रत्यङ्गमीश्वरी ।
यस्य स्मरणमात्रेण अलक्ष्मीर्नाशमाप्नुयात् ॥

*   *   *   *

रक्तां विचित्रवसनां नवचन्द्रजूटा-
मन्नप्रदाननिरतां स्तनभारनम्राम् ।
अन्नप्रदानानिरतां नवहेमवस्त्रा-
मम्बां भजे कनकमौक्तिकमाल्यशोभाम् ॥

End:

अन्नपूर्णाप्रयोगोऽयमुक्तो भक्तेष्टदायकः ।
किमन्यादिच्छसि श्रोतुं भूयो मे वद पार्वति ॥

Colophon:

इति श्रीमहात्रिपुरासिद्धान्ते अन्नपूर्णामन्त्रस्तोत्रकथनं नाम एकोनविंशकल्पस्संपूर्णः ॥

No. **10705.** अन्नपूर्णेश्वरीमन्त्रराजस्तवः.

ANNAPŪRṆĒŚVARĪMANTRARĀJASTAVAḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 11*a* of the MS. described under No. 5858.

Complete.

Similar to the above. Attributed to Śiva. The stanzas here begin successively with the various letters of the alphabet in order.

Beginning:

अस्य श्रीअन्नपूर्णेश्वरीमहा(स्तोत्र)मन्त्रस्य महाचमसकहोल ऋषिः अनुष्टुप् त्रिष्टुप् छन्दः

* * * *

अकारममृतं नित्यं मृष्टान्नं घृतसंप्लुतम् ।
आयुरारोग्यसिद्ध्यर्थमाकाराय नमोऽस्तु ते ॥

End:

इत्यावहन्तीस्तवमन्त्रराजवर्णस्तुतिं शान्तिकरं प्रशस्तम् ।
स्वाहान्तमन्त्रं स्वरमादिदीर्घमोङ्कारमाद्यन्तविधिप्रयोगम् ॥
आवहन्तीमहामन्त्रवर्णस्तोत्रं शिवोदितम् ।
भक्त्या युक्तः पठेद्यस्तु अष्टैश्वर्यं प्रयच्छति ।

No. **10706.** आभरणदेवतास्तुतिः.

ĀBHARAṆADĒVATĀSTUTIḤ.

Pages, 8. Lines, 16 on a page.

Begins on fol. 22*a* of the MS. described under No. 424.

Complete.

A eulogy on the goddess Śakti, conceived as being decked with ornaments all over the body.

Beginning:

पञ्चब्रह्ममहापञ्चतिरस्करणकारिणीम् ।
पञ्चकृत्यप्रपञ्चैकसम्राज्ञीं संविदं नुमः ॥
ब्राह्मे मुहूर्ते शयनादुत्थितोऽहं विचिन्तये ।
आमूलमाब्रह्मबिलं ज्वलन्तीं वरसंविदम् ॥

End:

कुवलयसदृगक्षी कुङ्कुमक्षोदताम्रा धृतगुणसृणिपाणिर्दीप्तपश्चेषुचापा ।
परचितिमयपश्चप्रेतमश्चाधिरूढा भवतु परमसंविद्भावना भाग्यभाजाम् ॥
इति षष्ठरत्नाय नमः ॥

No. 10707. आम्नायस्तवः.
ĀMNĀYASTAVAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 228*a* of the MS. described under No. 124.

Complete.

A eulogy on the goddesses Śuddhavidyā, Bālā, Dvādaśārdhā, Mataṅginī, etc., who are all considered to be different manifestations of Śakti.

Beginning:

श्रीनाथादिगुरु (. . .) मण्डलम् ॥
शुद्धविद्या च बाला च द्वादशार्धा मतङ्गिनी ।
एताः कामगिरीन्द्रस्थाः पूर्वाम्नायस्थदेवताः ॥

End:

यस्त्रिसन्ध्यं पठेद्विद्वानाम्नायस्तोत्रमुत्तमम् ।
सर्वपापविशुद्धात्मा सर्वैश्वर्यमतन्द्रितम् ॥
भुक्त्वा भोगान्यथाकामान् सर्वप्रियहिते रतः ॥
सुन्दरीलोकमाप्नोति वेदवाक्यानुसारतः ॥

Colophon:

आम्नायस्तवः संपूर्णः ॥

No. 10708. आम्नायस्तवः.
ĀMNĀYASTAVAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 82*b* of the MS. described under No. 8472.

Complete.

Same work as the above, but with the addition of one stanza in the beginning as given below :—

वन्दे गुरुपदद्वन्द्वमवाङ्मनसगोचरम् ।
रक्तशुक्लप्रभामिश्रमतर्क्यं त्रैपुरं महः ॥

No. **10709.** आम्नायस्तवः.

ĀMNĀYASTAVAḤ.

Pages, 4. Lines, 16 on a page.

Begins on fol. 192*a* of the MS. described under No. 424.

Complete.

Same work as the above, but without the introductory stanzas and with a different end as given below :—

स्फुरति यत्तव रूपमनुत्तरं स्फुरति यं च जगन्मयमम्बिके ।
ममयदेवततनुस्मतां (मम तथैव च तत् स्फुरतां) सदा अभयदे वरदे परदेवते ॥

Colophon :

इति समाप्तः ॥

No. **10710.** आम्नायस्तवः.

ĀMNĀYASTAVAḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 32*a* of the MS. described under No. 9571.

Incomplete.

Same work as the above.

No. **10711.** आम्नायस्तवः.

ĀMNĀYASTAVAḤ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 25*b* of the MS. described under No. 6274.

Complete.

Same work as the above, but without colophon.

No. 10712. आम्नायस्तवः. ĀMNĀYASTAVAḤ.

Pages, 4. Lines, 20 on a page.

Begins on fol. 16*a* of the MS. described under No. 7973.

Complete.

